वैयाकरणसिद्धान्तकौमुदी

६-तत्पुरुषसमासप्रकरणम् (उत्तरभागः)-५

०२.०२.२०१४

अग्राख्यायामुरसः (५.४.९३)

- पदद्वयम् । अग्राख्यायाम्, उरसः ।
- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- टच् स्यात् ।
- अश्वानाम् उरः इव अश्वोरसम् ।
- मुख्योऽश्वः इत्यर्थः ।
- मुख्यवाचिना उरश्शब्देन षष्ठीसमासः ।
- 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति नपुंसकत्वम् ।

- अग्राख्यायां किम्?
- देवदत्तस्य उरः देवदत्तोरः ।

अनोऽश्मायस्सरसां जातिसंज्ञयोः (५.४.९४)

- अनस्-अश्मन्-अयस्-सरसाम्, जाति-संज्ञयोः ।
- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- टच् स्यात् जातौ संज्ञायां च ।
- उपगतम् अनः उपानसम् ।
- अमृतः अश्म अमृताश्मः ।
- कालम् अयः कालायसम् ।

- मण्डूकानां सरः मण्डूकसरसम् ।
- इति जातिः ।
- महानसम्, पिण्डाश्मः, लोहितायसम्, जलसरसम् इति संज्ञा ।

ग्रामकौटाभ्यां च तक्षणः (५.४.९५)

- ग्रामकौटाभ्यां परः यः तक्षन्-शब्दः, तदन्तात् तत्पुरुषात् टच् स्यात् ।
- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- ग्रामस्य तक्षा ग्रामतक्षः ।
- साधारणः इत्यर्थः ।
- कुट्यां भवः कौटः, स्वतन्त्रः ।
- स चासौ तक्षा च कौटतक्षः ।
- टचि टिलोपः ।

अतेः शुनः (५.४.९६)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- अति इत्यव्ययात् परः यः श्वन्-शब्दः, तदन्तात् तत्पुरुषात् टच् स्यात् ।
- शुनम् अतिक्रान्तः अतिश्वो वराहः ।
- शुनम् अतिक्रान्ता अतिश्वी सेवा ।

उपमानादप्राणिषु (५.४.९७)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'अतेः शुनः' (५.४.९६) इत्यतः 'शुनः' इति च अनुवर्तते ।
- अप्राणिविषयक-उपमानवाचिनः शुनः टच् स्यात् ।
- आकर्षः श्वा इव आकर्षश्वः ।
- आकृष्यते कुसूलादिगतधान्यम् अनेन इत्याकर्षः, पञ्चाङ्गुलो दारुविशेषः ।
- अप्राणिषु किम्?
- वानरः श्वा इव वानरश्वा ।

उत्तरमृगपूर्वाच्च सक्थ्नः (५.४.९८)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- चादुपमानात् ।
- उत्तर, मृग, पूर्व एभ्यः उपमानाच्च परो यः सक्थिशब्दः तदन्तात् तत्पुरुषात् टच् स्यात् ।
- उत्तरं सक्थि उत्तरसक्थम् ।
- मृगस्य सक्थि मृगसक्थम् ।
- पूर्वं सक्थि पूर्वसक्थम् ।
- फलकमिव सक्थि फलकसक्थम् ।

नावो द्विगोः (५.४.९९)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'गोरतद्धितलुकि' (५.४.९२)' इत्यतः 'अतद्धितलुकि' इति च अनुवर्तते ।
- नौशब्दान्ताद् द्विगोः टच् स्यात्, न तु तद्धितलुकि ।
- द्वाभ्यां नौकाभ्याम् आगतः द्विनावरूप्यः ।
- तद्धितार्थे द्विगुसमासः, टच् समासान्तः, 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' इति तद्धितः रूप्यप्रत्ययः ।
- 'द्विगोर्लुगनपत्ये' इत्यत्र अचि इति अपकर्षणाद् हलादेः न लुक् ।
- पञ्चनावप्रियः ।

- द्विनावम् । त्रिनावम् ।
- अतद्धितलुकीति किम् - पञ्चभिः नौभिः क्रीतः पञ्चनौः ।
- ठक्, तस्य 'अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्' (५.१.२८) इति लुक् ।

अर्धाच्च (५.४.१००)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'नावो द्विगोः' (५.४.९९) इत्यतः 'नावः' च अनुवर्तते ।
- अर्धात् नावः टच् स्यात् ।
- नावः अर्धम् अर्धनावम् ।
- क्लीबत्वं लोकात् ।

खार्याः प्राचाम् (५.४.१०१)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'नावो द्विगोः' (५.४.९९) इत्यतः 'द्विगोः' इति, 'अर्धाच्च' (५.४.१००) इत्यतः 'अर्धात्' इति च अनुवर्तते ।
- द्विगोः अर्धाच्च खार्याः टज् वा स्यात् ।
- द्वयोः खार्योः समाहारः द्विखारम्, द्विखारि ।
- अर्धं खार्याः अर्धखारम्, अर्धखारि ।

द्वित्रिभ्यामञ्जलेः (५.४.१०२)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'नावो द्विगोः' (५.४.९९) इत्यतः 'द्विगोः' इति च अनुवर्तते ।
- टच् वा स्याद् द्विगौ ।
- द्वयोः अञ्जल्योः समाहारः द्व्यञ्जलम्, द्व्यञ्जलि ।

- अतद्धितलुकीत्येव ।
- द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः ।

ब्रह्मणो जानपदाख्यायाम् (५.४.१०४)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति च अनुवर्तते ।
- ब्रह्मान्तात् तत्पुरुषात् टच् स्यात् समासेन जानपदत्वम् आख्यायते चेत्।
- सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ।
- ब्रह्मा विप्रः ।
- जानपदेति किम्?
- देवब्रह्मा नारदः ।

कुमहद्भ्यामन्यतरस्याम् (५.४.१०५)

- 'समासान्ताः' (५.४.६८) इति अधिक्रियते । 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' (५.४.८६) इत्यतः 'तत्पुरुषस्य' इति, 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इति, 'ब्रह्मणो जानपदाख्यायाम्' (५.४.१०४) इत्यतः 'ब्रह्मणः' इति च अनुवर्तते ।
- आभ्यां ब्रह्मणः वा टच् स्यात् तत्पुरुषे ।
- कुत्सितो ब्रह्मा कुब्रह्मः, कुब्रह्मा ।
- महान् ब्रह्मा इति विग्रहे,

आन्महतः समानाधिकरणजातीययोः (६.३.४६)

- पदत्रयम् । आत्, महतः, समानाधिकरण-जातीययोः ।
- महतः आकारः अन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे ।
- महत् सु ब्रह्मन् सु (‘सन्महत्..’ इति कर्मधारयः)
- महत् सु ब्रह्मन् सु (टच्) अ (‘कुमहद्भ्याम्..’ इति टच् समासान्तः)
- महत् ब्रह्मन् अ (‘सुपो धातु..’ इति सुब्लुक्)
- महत् ब्रह्म् अ (‘नस्तद्धिते’ इति टिलोपः)
- मह आ ब्रह्म (‘आन्महतः..’ इति आत्वम्)
- महाब्रह्म (‘अकः सवर्णे दीर्घः’)

- महाब्रह्मः, महाब्रह्मा
- महादेवः ।
- महाजातीयः ।
- समानाधिकरणे किम्?
- महतः सेवा महत्सेवा ।
- लाक्षणिकं विहाय ‘सन्महत्..’ इति समासो ग्रहीष्यते इति चेत्, महाबाहुः न स्यात् ।
- तस्मात् ‘लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्’ इति परिभाषा नेह प्रवर्तते, समानाधिकरणग्रहणसामर्थ्यात् ।